# Meghadutam Kalidasa's Cloud Messenger

# મેઘદૂતમ્ (કાલિદાસ)

## Document Information

Text title : Meghaduta Kalidasa's Cloud Messenger

File name : meghanew.itx

Category : major_works, kAlidAsa

Location : doc_z_misc_major_works

Transliterated by : Avinash Sathaye, Jost Gippert

Proofread by : Avinash Sathaye, Rajani Arjun Shankar

Latest update : April 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 17, 2025

*sanskritdocuments.org*

# મેઘદૂતમ્ (કાલિદાસ)

## પૂર્વમેઘઃ

કશ્ચિત્ કાન્તાવિરહ-ગુરુણા સ્વાધિકારાત્પ્રમત્તઃ
શાપેનાસ્તઙ્ગમિત-મહિમા વર્ષભોગ્યેણ ભર્તુઃ ।
યક્ષશ્ચક્રે જનકતનયા-સ્નાન-પુણ્યોદકેષુ
સ્નિગ્ધચ્છાયા-તરુષુ વસતિં રામગિર્યાશ્રમેષુ ॥ ૧.૧॥

તસ્મિન્નદ્રૌ કતિચિદબલા-વિપ્રયુક્તઃ સ કામી
નીત્વા માસાન્ કનકવલય-ભ્રંશરિક્તપ્રકોષ્ઠઃ ।
આષાઢસ્ય પ્રથમદિવસે મેઘમાશ્લિષ્ટ-સાનું (પ્રશમ)
વપ્રક્રીડા-પરિણતગજ-પ્રેક્ષણીયં દદર્શ ॥ ૧.૨॥

તસ્ય સ્થિત્વા કથમપિ પુરઃ કૌતુકાધાન-હેતોઃ
અન્તર્બાષ્પશ્ચિરમનુચરો રાજરાજસ્ય દધ્યૌ ।
મેઘાલોકે ભવતિ સુખિનોઽપ્યન્યથાવૃત્તિ ચેતઃ
કણ્ઠાશ્લેષ-પ્રણયિનિ જને કિં પુનર્દૂરસંસ્થે ॥ ૧.૩॥

પ્રત્યાસન્ને નભસિ દયિતા-જીવિતાલમ્બનાર્થી
જીમૂતેન સ્વકુશલમયીં હારયિષ્યન્ પ્રવૃત્તિમ્ ।
સ પ્રત્યગ્રૈઃ કુટજકુસુમૈઃ કલ્પિતાર્ઘાય તસ્મૈ
પ્રીતઃ પ્રીતિપ્રમુખવચનં સ્વાગતં વ્યાજહાર ॥ ૧.૪॥

ધૂમજ્યોતિઃ સલિલમરુતાં સંનિપાતઃ ક્વ મેઘઃ
સંદેશાર્થાઃ ક્વ પટુકરણૈઃ પ્રાણિભિઃ પ્રાપણીયાઃ ।
ઇત્યૌત્સુક્યાદપરિગણયન્ ગુહ્યકસ્તં યયાચે
કામાર્તા હિ પ્રકૃતિ-કૃપણાશ્ચેતનાચેતનેષુ ॥ ૧.૫॥

જાતં વંશે ભુવનવિદિતે પુષ્કરાવર્તકાનાં
જાનામિ ત્વાં પ્રકૃતિપુરુષં કામરૂપં મઘોનઃ ।

તેનાર્થિત્વં ત્વયિ વિધિવશાદ્દૂરબન્ધુર્ગતોઽહં
યાચ્ઞા મોઘા વરમધિગુણે નાધમે લબ્ધકામા ॥ ૧.૬॥

સંતપ્તાનાં ત્વમસિ શરણં તત્ પયોદ પ્રિયાયાઃ
સંદેશં મે હર ધનપતિક્રોધ-વિશ્લેષિતસ્ય ।
ગન્તવ્યા તે વસતિરલકા નામ યક્ષેશ્વરાણાં
બાહ્યોદ્યાન-સ્થિતહર-શિરશ્ચન્દ્રિકા-ધૌતહર્મ્યા ॥ ૧.૭॥

ત્વામારૂઢં પવન-પદવીમુદ્ગૃહીતાલકાન્તાઃ
પ્રેક્ષિષ્યન્તે પથિકવનિતાઃ પ્રત્યયાદાશ્વસત્યઃ । (પ્રત્યયાદાશ્વસન્ત્યઃ)
કઃ સંનદ્ધે વિરહવિધુરાં ત્વય્યુપેક્ષેત જાયાં
ન સ્યાદન્યોઽપ્યહમિવ જનો યઃ પરાધીનવૃત્તિઃ ॥ ૧.૮॥

મન્દં મન્દં નુદતિ પવનશ્ચાનુકૂલો યથા ત્વાં
વામશ્ચાયં નદતિ મધુરં ચાતકસ્તે સગન્ધઃ ।
ગર્ભાધાન-ક્ષણપરિચયાન્નૂનમાબદ્ધ-માલાઃ
સેવિષ્યન્તે નયનસુભગં ખે ભવન્તં બલાકાઃ ॥ ૧.૯॥

તાં ચાવશ્યં દિવસગણના-તત્પરામેકપત્નીં
અવ્યાપન્નામવિહત-ગતિર્દ્રક્ષ્યસિ ભ્રાતૃજાયામ્ ।
આશાબન્ધઃ કુસુમસદૃશં પ્રાયશો હ્યઙ્ગનાનાં
સદ્યઃપાતિ પ્રણયિ હૃદયં વિપ્રયોગે રુણદ્ધિ ॥ ૧.૧૦॥

કર્તું યચ્ચ પ્રભવતિ મહીમુચ્છિલીન્ધ્રામવન્ધ્યાં (મહીમુચ્છિલીન્ધ્રાતપત્રાં)
તચ્છ્રુત્વા  તે શ્રવણસુભગં ગર્જિતં માનસોત્કાઃ ।
આ કૈલાસાદ્બિસ-કિસલયચ્છેદ-પાથેયવન્તઃ
સમ્પત્સ્યન્તે નભસિ ભવતો રાજહંસાઃ સહાયાઃ ॥ ૧.૧૧॥

આપૃચ્છસ્વ પ્રિયસખમમું તુઙ્ગમાલિઙ્ગ્ય શૈલં
વન્દ્યૈઃ પુંસાં રઘુપતિ-પદૈરઙ્કિતં મેખલાસુ ।
કાલે કાલે ભવતિ ભવતો યસ્ય સંયોગમેત્ય
સ્નેહ-વ્યક્તિશ્ચિર-વિરહજં મુઞ્ચતો વાષ્પમુષ્ણમ્ ॥ ૧.૧૨॥

માર્ગં તાવચ્છૃણુ કથયતસ્ત્વત્-પ્રયાણાનુરૂપં
સંદેશં મે તદનુ જલદ શ્રોષ્યસિ શ્રોત્રપેયમ્ ।
ખિન્નઃ ખિન્નઃ શિખરિષુ પદં ન્યસ્ય ગન્તાસિ યત્ર
ક્ષીણઃ ક્ષીણઃ પરિલઘુ પયઃ સ્રોતસાં ચોપભુજ્ય ॥ ૧.૧૩॥

અદ્રેઃ શ‍ૃઙ્ગં હરતિ પવનઃ કિં સ્વિદિત્યુન્મુખીભિર્
દૃષ્ટોત્સાહશ્ચકિતચકિતં મુગ્ધ-સિદ્ધાઙ્ગનાભિઃ ।
સ્થાનાદસ્માત્ સરસ-નિચુલાદુત્પતોદઙ્મુખઃ ખં
દિઙ્નાગાનાં પથિ પરિહરન્ સ્થૂલ-હસ્તાવલેપાન્ ॥ ૧.૧૪॥

રત્નચ્છાયા-વ્યતિકર ઇવ પ્રેક્ષ્યમેતત્ પુરસ્તાદ્
વલ્મીકાગ્રાત્ પ્રભવતિ ધનુઃખણ્ડમાખણ્ડલસ્ય ।
યેન શ્યામં વપુરતિતરાં કાન્તિમાપત્સ્યતે તે
બર્હેણેવ સ્ફુરિતરુચિના ગોપવેષસ્ય વિષ્ણોઃ ॥ ૧.૧૫॥

ત્વય્યાયત્તં કૃષિફલમિતિ ભ્રૂવિલાસાનભિજ્ઞૈઃ (ભ્રૂવિકારા)
પ્રીતિ-સ્નિગ્ધૈર્જનપદ-વધૂ-લોચનૈઃ પીયમાનઃ ।
સદ્યઃસીરોત્કષણ-સુરભિ ક્ષેત્રમારુહ્ય માલં
કિંચિત્પશ્ચાદ્-વ્રજ લઘુગતિર્ભૂય એવોત્તરેણ ॥ ૧.૧૬॥

ત્વામાસાર-પ્રશમિત-વનોપપ્લવં સાધુ મૂર્ધ્ના
વક્ષ્યત્યધ્વ-શ્રમપરિગતં સાનુમાનામ્રકૂટઃ ।
ન ક્ષુદ્રોઽપિ પ્રથમ-સુકૃતાપેક્ષયા સંશ્રયાય
પ્રાપ્તે મિત્રે ભવતિ વિમુખઃ કિં પુનર્યસ્તથોચ્ચૈઃ ॥ ૧.૧૭॥

છન્નોપાન્તઃ પરિણત-ફલદ્યોતિભિઃ કાનનામ્રૈઃ
ત્વય્યારૂઢે શિખરમચલઃ સ્નિગ્ધવેણીસવર્ણે ।
નૂનં યાસ્યત્યમરમિથુન-પ્રેક્ષણીયામવસ્થાં
મધ્યે શ્યામઃ સ્તન ઇવ ભુવઃ શેષવિસ્તારપાણ્ડુઃ ॥ ૧.૧૮॥

અધ્વક્લાન્તં પ્રતિમુખગતં સાનુમાનામ્રકૂટઃ
તુઙ્ગેન ત્વાં જલદ શિરસા વક્ષ્યતિ શ્લાઘમાનઃ ।
આસારેણ ત્વમપિ શમયેસ્તસ્ય નૈદાઘમગ્નિં
સદ્ભાવાર્દ્રઃ ફલતિ ન ચિરેણોપકારો મહત્સુ ॥ ? ॥

સ્થિત્વા તસ્મિન્ વનચરવધૂ-ભુક્તકુઞ્જે મુહૂર્તં
તોયોત્સર્ગ-દ્રુતતરગતિસ્તત્પરં વર્ત્મ તીર્ણઃ ।
રેવાં દ્રક્ષ્યસ્યુપલ-વિષમે વિન્ધ્યપાદે વિશીર્ણાં
ભક્તિચ્છેદૈરિવ વિરચિતાં ભૂતિમઙ્ગે ગજસ્ય ॥ ૧.૧૯॥

તસ્યાસ્તિક્તૈર્વનગજ-મદૈર્વાસિતં વાન્તવૃષ્ટિઃ

જમ્બૂકુઞ્જ-પ્રતિહતરયં તોયમાદાય ગચ્છેઃ ।
અન્તઃસારં ઘન તુલયિતું નાનિલઃ શક્ષ્યતિ ત્વાં
રિક્તઃ સર્વો ભવતિ હિ લઘુઃ પૂર્ણતા ગૌરવાય ॥ ૧.૨૦॥

નીપં દૃષ્ટ્વા હરિત-કપિશં કેસરૈરર્ધરૂઢૈઃ
આવિર્ભૂત-પ્રથમમુકુલાઃ કન્દલીશ્ચાનુકચ્છમ્ ।
જગ્ધ્વાઽરણ્યેષ્વધિકસુરભિં ગન્ધમાઘ્રાય ચોર્વ્યાઃ
સારઙ્ગાસ્તે જલલવમુચઃ સૂચયિષ્યન્તિ માર્ગમ્ ॥ ૧.૨૧॥

અમ્ભોબિન્દુગ્રહણચતુરાંશ્ચાતકાન્ વીક્ષમાણાઃ
શ્રેણીભૂતાઃ પરિગણનયા નિર્દિશન્તો બલાકાઃ ।
ત્વામાસાદ્ય સ્તનિતસમયે માનયિષ્યન્તિ સિદ્ધાઃ
સોત્કમ્પાનિ પ્રિયસહચરીસંભ્રમાલિઙ્ગિતાનિ ॥ ?॥

ઉત્પશ્યામિ દ્રુતમપિ સખે મત્પ્રિયાર્થં યિયાસોઃ
કાલક્ષેપં કકુભસુરભૌ પર્વતે પર્વતે તે ।
શુક્લાપાઙ્ગૈઃ સજલનયનૈઃ સ્વાગતીકૃત્ય કેકાઃ
પ્રત્યુદ્યાતઃ કથમપિ ભવાન્ ગન્તુમાશુ વ્યવસ્યેત્ ॥ ૧.૨૨॥

પાણ્ડુચ્છાયોપવન-વૃતયઃ કેતકૈઃ સૂચિભિન્નૈઃ
નીડારમ્ભૈર્ગૃહ-બલિભુજામાકુલ-ગ્રામચૈત્યાઃ ।
ત્વય્યાસન્ને પરિણતફલ-શ્યામજમ્બૂ-વનાન્તાઃ
સમ્પત્સ્યન્તે કતિપય-દિનસ્થાયિ-હંસા દશાર્ણાઃ ॥ ૧.૨૩॥

તેષાં દિક્ષુ પ્રથિત-વિદિશા-લક્ષણાં રાજધાનીં
ગત્વા સદ્યઃ ફલમવિકલં કામુકત્વસ્ય લબ્ધા ।
તીરોપાન્ત-સ્તનિતસુભગં પાસ્યસિ સ્વાદુ યસ્માત્
સભ્રૂભઙ્ગં મુખમિવ પયો વેત્રવત્યાશ્ચલોર્મિ ॥ ૧.૨૪॥

નીચૈરાખ્યં ગિરિમધિવસેસ્તત્ર વિશ્રામહેતોઃ
ત્વત્સમ્પર્કાત્ પુલકિતમિવ પ્રૌઢપુષ્પૈઃ કદમ્બૈઃ ।
યઃ પણ્યસ્ત્રી-રતિપરિમલોદ્ગારિભિર્નાગરાણાં
ઉદ્દામાનિ પ્રથયતિ શિલા-વેશ્મભિર્યૌવનાનિ ॥ ૧.૨૫॥

વિશ્રાન્તઃ સન્ વ્રજ વનનદી-તીરજાતાનિ સિઞ્ચન્ (તીરજાનાં નિષિઞ્ચન્)
ઉદ્યાનાનાં નવજલ-કણૈર્યૂથિકા-જાલકાનિ ।
ગણ્ડસ્વેદાપનયન-રુજા-ક્લાન્ત-કર્ણોત્પલાનાં

છાયાદાનાત્ ક્ષણપરિચિતઃ પુષ્પલાવી-મુખાનામ્ ॥ ૧.૨૬॥

વક્રઃ પન્થા યદપિ ભવતઃ પ્રસ્થિતસ્યોત્તરાશાં
સૌધોત્સઙ્ગ-પ્રણયવિમુખો મા સ્મ ભૂરુજ્જયિન્યાઃ ।
વિદ્યુદ્દામ-સ્ફુરિતચકિતૈસ્તત્ર પૌરાઙ્ગનાનાં
લોલાપાઙ્ગૈર્યદિ ન રમસે લોચનૈર્વઞ્ચિતોઽસિ ॥ ૧.૨૭॥

વીચિક્ષોભ-સ્તનિતવિહગ-શ્રેણિ-કાઞ્ચીગુણાયાઃ
સંસર્પન્ત્યાઃ સ્ખલિતસુભગં દર્શિતાવર્તનાભેઃ ।
નિર્વિન્ધ્યાયાઃ પથિ ભવ રસાભ્યન્તરઃ સન્નિપત્ય
સ્ત્રીણામાદ્યં પ્રણયવચનં વિભ્રમો હિ પ્રિયેષુ ॥ ૧.૨૮॥

વેણીભૂત-પ્રતનુસલિલા તામતીતસ્ય સિન્ધુઃ
પાણ્ડુચ્છાયા તટરુહ-તરુભ્રંશિભિર્જીર્ણપર્ણૈઃ ।
સૌભાગ્યં તે સુભગ વિરહાવસ્થયા વ્યઞ્જયન્તી
કાર્શ્યં યેન ત્યજતિ વિધિના સ ત્વયૈવોપપાદ્યઃ ॥ ૧.૨૯॥

પ્રાપ્યાવન્તીનુદયન-કથાકોવિદ-ગ્રામવૃદ્ધાન્
પૂર્વોદ્દિષ્ટામનુસર પુરીં શ્રીવિશાલાં વિશાલામ્ ।
સ્વલ્પીભૂતે સુચરિતફલે સ્વર્ગિણાં ગાં ગતાનાં
શેષૈઃ પુણ્યૈર્હૃતમિવ દિવઃ કાન્તિમત્ ખણ્ડમેકમ્ ॥ ૧.૩૦॥

દીર્ઘીકુર્વન્ પટુ મદકલં કૂજિતં સારસાનાં
પ્રત્યૂષેષુ સ્ફુટિત-કમલામોદ-મૈત્રીકષાયઃ ।
યત્ર સ્ત્રીણાં હરતિ સુરતગ્લાનિમઙ્ગાનુકૂલઃ
શિપ્રાવાતઃ પ્રિયતમ ઇવ પ્રાર્થનાચાટુકારઃ ॥ ૧.૩૧॥

હારાંસ્તારાંસ્તરલ-ગુટિકાન્ કોટિશઃ શઙ્ખ-શુક્તીઃ
શષ્પ-શ્યામાન્ મરકત-મણીનુન્મયૂખ-પ્રરોહાન્ ।
દૃષ્ટ્વા યસ્યાં વિપણિ-રચિતાન્ વિદ્રુમાણાં ચ ભઙ્ગાન્
સંલક્ષ્યન્તે સલિલનિધયસ્તોય-માત્રાવશેષાઃ ॥ ૧.૩૨॥

પ્રદ્યોતસ્ય પ્રિયદુહિતરં વત્સરાજોઽત્ર જહ્રે
હૈમં તાલદ્રુમ-વનમભૂદત્ર તસ્યૈવ રાજ્ઞઃ ।
અત્રોદ્ભ્રાન્તઃ કિલ નલગિરિઃ સ્તમ્ભમુત્પાટ્ય દર્પાદ્
ઇત્યાગન્તૂન્ રમયતિ જનો યત્ર બન્ધૂનભિજ્ઞઃ ॥ ૧.૩૩॥

જાલોદ્ગીર્ણૈરુપચિત-વપુઃ કેશ-સંસ્કારધૂપૈઃ
બન્ધુપ્રીત્યા ભવનશિખિભિર્દત્તનૃત્ત્યોપહારઃ ।
હર્મ્યેષ્વસ્યાઃ કુસુમ-સુરભિષ્વધ્વખેદં નયેથા
લક્ષ્મીં પશ્યંલ્લલિતવનિતાપાદરાગાઙ્કિતેષુ ॥ ૧.૩૪॥
(નીત્વા રાત્રિં લલિતવનિતાપાદરાગાઙ્કિતેષુ ॥ ૧.૩૪॥)

ભર્તુઃ કણ્ઠચ્છવિરિતિ ગણૈઃ સાદરં વીક્ષ્યમાણઃ
પુણ્યં યાયાસ્ત્રિભુવન-ગુરોર્ધામ ચણ્ડીશ્વરસ્ય ।
ધૂતોદ્યાનં કુવલયરજો-ગન્ધિભિર્ગન્ધવત્યાઃ
તોયક્રીડા-નિરતયુવતિ-સ્નાન-તિક્તૈર્મરુદ્ભિઃ ॥ ૧.૩૫॥

અપ્યન્યસ્મિઞ્-જલધર મહાકાલમાસાદ્ય કાલે
સ્થાતવ્યં તે નયનવિષયં યાવદત્યેતિ ભાનુઃ ।
કુર્વન્ સંધ્યાબલિ-પટહતાં શૂલિનઃ શ્લાઘનીયાં
આમન્દ્રાણાં ફલમવિકલં લપ્સ્યસે ગર્જિતાનામ્ ॥ ૧.૩૬॥

પાદન્યાસૈઃ ક્વણિત-રશનાસ્તત્ર લીલાવધૂતૈ
રત્નચ્છાયા-ખચિત-વલિભિશ્ચામરૈઃ ક્લાન્તહસ્તાઃ ।
વેશ્યાસ્ત્વત્તો નખપદ-સુખાન્ પ્રાપ્ય વર્ષાગ્ર-બિન્દૂન્
આમોક્ષ્યન્તે ત્વયિ મધુકર-શ્રેણિદીર્ઘાન્ કટાક્ષાન્ ॥ ૧.૩૭॥

પશ્ચાદુચ્ચૈર્ભુજતરુવનં મણ્ડલેનાભિલીનઃ
સાંધ્યં તેજઃ પ્રતિનવ-જપાપુષ્પરક્તં દધાનઃ ।
નૃત્યારમ્ભે હર પશુપતેરાર્દ્રનાગાજિનેચ્છાં (નૃત્તા)
શાન્તોદ્વેગ-સ્તિમિતનયનં દૃષ્ટભક્તિર્ભવાન્યા ॥ ૧.૩૮॥

ગચ્છન્તીનાં રમણવસતિં યોષિતાં તત્ર નક્તં
રુદ્ધાલોકે નરપતિપથે સૂચિભેદ્યૈસ્તમોભિઃ ।
સૌદામિન્યા કનકનિકષ-સ્નિગ્ધયા દર્શયોર્વીં
તોયોત્સર્ગ-સ્તનિતમુખરો મા સ્મ ભૂર્વિક્લવાસ્તાઃ ॥ ૧.૩૯॥

તાં કસ્યાંચિદ્-ભવનવલભૌ સુપ્ત-પારાવતાયાં
નીત્વા રાત્રિં ચિરવિલસનાત્ ખિન્નવિદ્યુત્કલત્રઃ ।
દૃષ્ટે સૂર્યે પુનરપિ ભવાન્ વાહયેદધ્વશેષં
મન્દાયન્તે ન ખલુ સુહૃદામભ્યુપેતાર્થકૃત્યાઃ ॥ ૧.૪૦॥

તસ્મિન્ કાલે નયનસલિલં યોષિતાં ખણ્ડિતાનાં

શાન્તિં નેયં પ્રણયિભિરતો વર્ત્મ ભાનોસ્ત્યજાશુ ।
પ્રાલેયાસ્રં કમલવદનાત્ સોઽપિ હર્તું નલિન્યાઃ
પ્રત્યાવૃત્તસ્ત્વયિ કરરુધિ સ્યાદનલ્પાભ્યસૂયઃ ॥ ૧.૪૧॥

ગમ્ભીરાયાઃ પયસિ સરિતશ્ચેતસીવ પ્રસન્ને
છાયાત્માઽપિ પ્રકૃતિસુભગો લપ્સ્યતે તે પ્રવેશમ્ ।
તસ્માત્ તસ્યાઃ કુમુદવિશદાન્યર્હસિ ત્વં ન ધૈર્યાન્-
મોઘીકર્તું ચટુલ-શફરોદ્વર્તન-પ્રેક્ષિતાનિ ॥ ૧.૪૨॥

તસ્યાઃ કિંચિત્ કરધૃતમિવ પ્રાપ્ત-વાનીરશાખં
નીત્વા નીલં સલિલવસનં મુક્તરોધો-નિતમ્બમ્ ।
પ્રસ્થાનં તે કથમપિ સખે લમ્બમાનસ્ય ભાવિ
જ્ઞાતાસ્વાદો વિવૃતજઘનાં કો વિહાતું સમર્થઃ ॥ ૧.૪૩॥

ત્વન્નિષ્યન્દોચ્છ્વસિત-વસુધા-ગન્ધસમ્પર્ક-રમ્યઃ
સ્રોતોરન્ધ્ર-ધ્વનિતસુભગં દન્તિભિઃ પીયમાનઃ ।
નીચૈર્વાસ્યત્યુપજિગમિષોર્દેવપૂર્વં ગિરિં તે
શીતો વાયુઃ પરિણમયિતા કાનનોદુમ્બરાણામ્ ॥ ૧.૪૪॥

તત્ર સ્કન્દં નિયતવસતિં પુષ્પમેઘીકૃતાત્મા
પુષ્પાસારૈઃ સ્નપયતુ ભવાન્ વ્યોમગઙ્ગા-જલાર્દ્રૈઃ ।
રક્ષાહેતોર્નવ-શશિભૃતા વાસવીનાં ચમૂનાં
અત્યાદિત્યં હુતવહમુખે સંભૃતં તદ્ધિ તેજઃ ॥ ૧.૪૫॥

જ્યોતિર્લેખા-વલયિ ગલિતં યસ્ય બર્હં ભવાની
પુત્રપ્રેમ્ણા કુવલય-દલપ્રાપિ કર્ણે કરોતિ । ( કુવલય-પદ)
ધૌતાપાઙ્ગં હરશશિરુચા પાવકેસ્તં મયૂરં
પશ્ચાદદ્રિ-ગ્રહણગુરુભિર્ગર્જિતૈર્નર્તયેથાઃ ॥ ૧.૪૬॥

આરાધ્યૈનં શરવણભવં દેવમુલ્લઙ્ઘિતાધ્વા
સિદ્ધ-દ્વન્દ્વૈર્જલકણભયાદ્વીણિભિર્મુક્તમાર્ગઃ ।
વ્યાલમ્બેથાઃ સુરભિ-તનયાલમ્ભજાં માનયિષ્યન્
સ્રોતોમૂર્ત્યા ભુવિ પરિણતાં રન્તિદેવસ્ય કીર્તિમ્ ॥ ૧.૪૭॥

ત્વય્યાદાતું જલમવનતે શાર્ઙ્ગિણો વર્ણચૌરે
તસ્યાઃ સિન્ધોઃ પૃથુમપિ તનું દૂરભાવાત્ પ્રવાહમ્ ।
પ્રેક્ષિષ્યન્તે ગગનગતયો નૂનમાવર્જ્ય દૃષ્ટીઃ

એકં મુક્તાગુણમિવ ભુવઃ સ્થૂલમધ્યેન્દ્રનીલમ્ ॥ ૧.૪૮॥

તામુત્તીર્ય વ્રજ પરિચિત-ભ્રૂલતા-વિભ્રમાણાં
પક્ષ્મોત્ક્ષેપાદુપરિ-વિલસત્કૃષ્ણશાર-પ્રભાણામ્ ।
કુન્દક્ષેપાનુગ-મધુકર-શ્રીમુષામાત્મબિમ્બં
પાત્રીકુર્વન્ દશપુરવધૂ-નેત્રકૌતૂહલાનામ્ ॥ ૧.૪૯॥

બ્રહ્માવર્તં જનપદમથશ્છાયયા ગાહમાનઃ
ક્ષેત્રં ક્ષત્રપ્રધન-પિશુનં કૌરવં તદ્ ભજેથાઃ ।
રાજન્યાનાં શિતશર-શતૈર્યત્ર ગાણ્ડીવધન્વા
ધારાપાતૈસ્ત્વમિવ કમલાન્યભ્યવર્ષન્મુખાનિ ॥ ૧.૫૦॥

હિત્વા હાલામભિમતરસાં રેવતી-લોચનાઙ્કાં
બન્ધુપ્રીત્યા સમરવિમુખો લાઙ્ગલી યાઃ સિષેવે ।
કૃત્વા તાસામભિગમમપાં સૌમ્ય સારસ્વતીનાં
અન્તઃશુદ્ધસ્ત્વમપિ ભવિતા વર્ણમાત્રેણ કૃષ્ણઃ ॥ ૧.૫૧॥

તસ્માદ્-ગચ્છેરનુકનખલં શૈલરાજાવતીર્ણાં
જહ્નોઃ કન્યાં સગરતનય-સ્વર્ગસોપાન-પઙ્ક્તિમ્ ।
ગૌરીવક્ત્ર-ભ્રુકુટિરચનાં યા વિહસ્યેવ ફેનૈઃ
શંભોઃ કેશગ્રહણમકરોદિન્દુ-લગ્નોર્મિહસ્તા ॥ ૧.૫૨॥

તસ્યાઃ પાતું સુરગજ ઇવ વ્યોમ્નિ પૂર્વાર્ધલમ્બી
ત્વં ચેદચ્છ-સ્ફટિક-વિશદં તર્કયેસ્તિર્યગમ્ભઃ ।
સંસર્પન્ત્યા સપદિ ભવતઃ સ્રોતસિ છાયયાઽસૌ
સ્યાદસ્થાનોપગત-યમુના-સઙ્ગમેવાભિરામા ॥ ૧.૫૩॥

આસીનાનાં સુરભિતશિલં નાભિગન્ધૈર્મૃગાણાં
તસ્યા એવ પ્રભવમચલં પ્રાપ્ય ગૌરં તુષારૈઃ ।
વક્ષ્યસ્યધ્વ-શ્રમવિનયને તસ્ય શ ૃઙ્ગે નિષણ્ણઃ
શોભાં શુભ્ર-ત્રિનયનવૃષોત્ખાત-પઙ્કોપમેયામ્ ॥ ૧.૫૪॥

તં ચેદ્ વાયૌ સરતિ સરલ-સ્કન્ધ-સઙ્ઘટ્ટજન્મા
બાધેતોલ્કા-ક્ષપિતચમરી-બાલભારો દવાગ્નિઃ ।
અર્હસ્યેનં શમયિતુમલં વારિધારાસહસ્રૈઃ
આપન્નાર્તિ-પ્રશમનફલાઃ સમ્પદો હ્યુત્તમાનામ્ ॥ ૧.૫૫॥

યે સંરમ્ભોત્પતન-રભસાઃ સ્વાઙ્ગભઙ્ગાય તસ્મિન્
મુક્તાધ્વાનં સપદિ શરભા લઙ્ઘયેયુર્ભવન્તમ્ ।
તાન્ કુર્વીથાસ્તુમુલ-કરકાવૃષ્ટિ-પાતાવકીર્ણાન્
કે વા ન સ્યુઃ પરિભવપદં નિષ્ફલારમ્ભ-યત્નાઃ ॥ ૧.૫૬॥
(યે ત્વાં મુક્તધ્વનિમસહનાઃ કાયભઙ્ગાય તસ્મિન્
દર્પોત્સેકાદુપરિ શરભા લઙ્ઘયિષ્યન્ત્યલઙ્ઘ્યમ્ ।)

તત્ર વ્યક્તં દૃષદિ ચરણન્યાસમર્ધેન્દુમૌલેઃ
શશ્વત્ સિદ્ધૈરુપહૃતબલિં ભક્તિનમ્રઃ પરીયાઃ ।
યસ્મિન્ દૃષ્ટે કરણવિગમાદૂર્ધ્વમુદ્ધૂતપાપાઃ
સંકલ્પન્તે સ્થિર-ગણપદ-પ્રાપ્તયે શ્રદ્દધાનાઃ ॥ ૧.૫૭॥ (કલ્પિષ્યન્તે)

શબ્દાયન્તે મધુરમનિલૈઃ કીચકાઃ પૂર્યમાણાઃ
સંસક્તાભિસ્ત્રિપુરવિજયો ગીયતે કિંનરીભિઃ ।
નિર્હ્રાદસ્તે મુરજ ઇવ ચેત્ કન્દરેષુ ધ્વનિઃ સ્યાત્ (નિર્હ્રાદી તે)
સઙ્ગીતાર્થો નનુ પશુપતેસ્તત્ર ભાવી સમગ્રઃ ॥ ૧.૫૮॥

પ્રાલેયાદ્રેરુપતટમતિક્રમ્ય તાંસ્તાન્ વિશેષાન્
હંસદ્વારં ભૃગુપતિ-યશોવર્ત્મ યત્ ક્રૌઞ્ચરન્ધ્રમ્ ।
તેનોદીચીં દિશમનુસરેસ્તિર્યગાયામ-શોભી
શ્યામઃ પાદો બલિ-નિયમનાભ્યુદ્યતસ્યેવ વિષ્ણોઃ ॥ ૧.૫૯॥

ગત્વા ચોર્ધ્વં દશમુખ-ભુજોચ્છ્વાસિત-પ્રસ્થસંધેઃ
કૈલાસસ્ય ત્રિદશવનિતા-દર્પણસ્યાતિથિઃ સ્યાઃ ।
શ઼ૃઙ્ગોચ્છ્રાયૈઃ કુમુદવિશદૈર્યો વિતત્ય સ્થિતઃ ખં
રાશીભૂતઃ પ્રતિદિનમિવ ત્ર્યમ્બકસ્યાટ્ટહાસઃ ॥ ૧.૬૦॥

ઉત્પશ્યામિ ત્વયિ તટગતે સ્નિગ્ધ-ભિન્નાઞ્જનાભે
સદ્યઃકૃત્તદ્વિરદ-દશનચ્છેદગૌરસ્ય તસ્ય ।
શોભામદ્રેઃ સ્તિમિતનયનપ્રેક્ષણીયાં ભવિત્રીં
અંસન્યસ્તે સતિ હલભૃતો મેચકે વાસસીવ ॥ ૧.૬૧॥

હિત્વા તસ્મિન્ભુજગવલયં શંભુના દત્તહસ્તા
ક્રીડાશૈલે યદિ ચ વિચરેત્ પાદચારેણ ગૌરી ।
ભઙ્ગીભક્ત્યા વિરચિતવપુઃ સ્તમ્ભિતાન્તર્જલૌઘઃ
સોપાનત્વં કુરુ મણિતટારોહણાયાગ્રયાયી ॥ ૧.૬૨॥

તત્રાવશ્યં વલય-કુલિશોદ્ઘટ્ટનોગ્દીર્ણ-તોયં
નેષ્યન્તિ ત્વાં સુરયુવતયો યન્ત્રધારા-ગૃહત્વમ્ ।
તાભ્યો મોક્ષસ્તવ યદિ સખે ઘર્મલબ્ધસ્ય ન સ્યાત્
ક્રીડાલોલાઃ શ્રવણપરુષૈર્ગર્જિતૈર્ભાયયેસ્તાઃ ॥ ૧.૬૩॥

હેમામ્ભોજ-પ્રસવિ સલિલં માનસસ્યાદદાનઃ
કુર્વન્ કામં ક્ષણમુખપટ-પ્રીતિમૈરાવતસ્ય ।
ધુન્વન્કલ્પદ્રુમ-કિસલયાન્યંશુકાનીવ વાતૈઃ
નાનાચેષ્ટૈર્જલદ લલિતૈર્નિર્વિશેસ્તં નગેન્દ્રમ્ ॥ ૧.૬૪॥
(ધુન્વન્ વાતૈઃ સજલપૃષતૈઃ કલ્પવૃક્ષાંશુકાનિ
ચ્છાયાભિન્નઃ સ્ફટિકવિશદં નિર્વિશેઃ પર્વતં તમ્ ॥ ૧.૬૪॥)

તસ્યોત્સઙ્ગે પ્રણયિન ઇવ સ્રસ્ત-ગઙ્ગાદુકૂલાં
ન ત્વં દૃષ્ટ્વા ન પુનરલકાં જ્ઞાસ્યસે કામચારિન્ ।
યા વઃ કાલે વહતિ સલિલોદ્ગારમુચ્ચૈર્વિમાના
મુક્તાજાલ-ગ્રથિતમલકં કામિનીવાભ્રવૃન્દમ્ ॥ ૧.૬૫॥

## ઉત્તરમેઘઃ

વિદ્યુત્વન્તં લલિતવનિતાઃ સેન્દ્રચાપં સચિત્રાઃ
સઙ્ગીતાય પ્રહતમુરજાઃ સ્નિગ્ધ-ગમ્ભીરઘોષમ્ ।
અન્તસ્તોયં મણિમયભુવસ્તુઙ્ગમભ્રંલિહાગ્રાઃ
પ્રાસાદાસ્ત્વાં તુલયિતુમલં યત્ર તૈસ્તૈર્વિશેષૈઃ ॥ ૨.૧॥

હસ્તે લીલા-કમલમલકે બાલકુન્દાનુવિદ્ધં
નીતા લોધ્ર-પ્રસવરજસા પાણ્ડુતામાનને શ્રીઃ ।
ચૂડાપાશે નવકુરબકં ચારુ કર્ણે શિરીષં
સીમન્તે ચ ત્વદુપગમજં યત્ર નીપં વધૂનામ્ ॥ ૨.૨॥

યત્રોન્મત્ત-ભ્રમરમુખરાઃ પાદપા નિત્યપુષ્પા
હંસશ્રેણી-રચિતરશના નિત્યપદ્મા નલિન્યઃ ।
કેકોત્કણ્ઠા ભવનશિખિનો નિત્યભાસ્વત્-કલાપા
નિત્યજ્યોત્સ્નાઃ પ્રતિહત-તમોવૃત્તિ-રમ્યાઃ પ્રદોષાઃ ॥ ૨.૩॥

આનન્દોત્થં નયનસલિલં યત્ર નાન્યૈર્નિમિત્તૈઃ

નાન્યસ્તાપઃ કુસુમશરજાદિષ્ટ-સંયોગસાધ્યાત્ ।
નાપ્યન્યસ્માત્ પ્રણયકલહાદ્-વિપ્રયોગોપપત્તિઃ
વિત્તેશાનાં ન ચ ખલુ વયો યૌવનાદન્યદસ્તિ ॥ ૨.૪॥

યસ્યાં યક્ષાઃ સિતમણિ-મયાન્યેત્ય હર્મ્યસ્થલાનિ
જ્યોતિશ્છાયાકુસુમ-રચિતાન્યુત્તમસ્ત્રીસહાયાઃ ।
આસેવન્તે મધુ રતિફલં કલ્પવૃક્ષપ્રસૂતં
ત્વદ્ગમ્ભીરધ્વનિષુ શનકૈઃ પુષ્કરેષ્વાહતેષુ ॥ ૨.૫॥

મન્દાકિન્યાઃ સલિલશિશિરૈઃ સેવ્યમાના મરુદ્ભિઃ
મન્દારાણામનુતટરુહાં છાયયા વારિતોષ્ણાઃ ।
અન્વેષ્ટવ્યૈઃ કનકસિકતામુષ્ટિ-નિક્ષેપગૂઢૈઃ
સંક્રીડન્તે મણિભિરમરપ્રાર્થિતા યત્ર કન્યાઃ ॥ ૨.૬॥

નીવીબન્ધોચ્છ્વસિત-શિથિલં યત્ર બિમ્બાધરાણાં
ક્ષૌમં રાગાદનિભૃત-કરેષ્વાક્ષિપત્સુ પ્રિયેષુ ।
અર્ચિસ્તુઙ્ગાનભિમુખમપિ પ્રાપ્ય રત્નપ્રદીપાન્
હ્રીમૂઢાનાં ભવતિ વિફલપ્રેરણા ચૂર્ણમુષ્ટિઃ ॥ ૨.૭॥

નેત્રા નીતાઃ સતતગતિના યદ્વિમાનાગ્રભૂમીઃ
આલેખ્યાનાં નવજલ-કણૈર્દોષમુત્પાદ્ય સદ્યઃ ।
શઙ્કાસ્પૃષ્ટા ઇવ જલમુચસ્ત્વાદૃશા જાલમાર્ગૈઃ
ધૂમોદ્ગારાનુકૃતિ-નિપુણા જર્જરા નિષ્પતન્તિ ॥ ૨.૮॥

યત્ર સ્ત્રીણાં પ્રિયતમભુજાલિઙ્ગનોચ્છ્વાસિતાનાં (ભુજોચ્છ્વાસિતાલિઙ્ગિતાનાં)
અઙ્ગગ્લાનિં સુરતજનિતાં તન્તુજાલાવલમ્બાઃ ।
ત્વત્સંરોધાપગમ-વિશદૈશ્ચન્દ્રપાદૈર્નિશીથે
વ્યાલુમ્પન્તિ સ્ફુટજલલવ-સ્યન્દિનશ્ચન્દ્રકાન્તાઃ ॥ ૨.૯॥

અક્ષય્યાન્તર્ભવનનિધયઃ પ્રત્યહં રક્તકણ્ઠૈઃ
ઉદ્ગાયદ્ભિર્ધનપતિ-યશઃ કિંનરૈર્યત્ર સાર્ધમ્ ।
વૈભ્રાજાખ્યં વિબુધવનિતા-વારમુખ્યાસહાયા
બદ્ધાલાપા બહિરુપવનં કામિનો નિર્વિશન્તિ ॥ ૨.૧૦॥

ગત્યુત્કમ્પાદલક-પતિતૈર્યત્ર મન્દારપુષ્પૈઃ
પત્રચ્છેદૈઃ કનકકમલૈઃ કર્ણવિભ્રંશિભિશ્ચ ।
મુક્તાજાલૈઃ સ્તનપરિસરચ્છિન્નસૂત્રૈશ્ચ હારૈઃ

નૈશો માર્ગઃ સવિતુરુદયે સૂચ્યતે કામિનીનામ્ ॥ ૨.૧૧॥

વાસશ્ચિત્રં મધુ નયનયોર્વિભ્રમાદેશ-દક્ષં
પુષ્પોદ્ભેદં સહ કિસલયૈર્ભૂષણાનાં વિકલ્પાન્ । (વિકલ્પમ્ )
લાક્ષારાગં ચરણકમલ-ન્યાસયોગ્યં ચ યસ્યાં
એકઃ સૂતે સકલમબલા-મણ્ડનં કલ્પવૃક્ષઃ ॥ ૨.૧૨॥

પત્રશ્યામા દિનકર-હયસ્પર્ધિનો યત્ર વાહાઃ
શૈલોદગ્રાસ્ત્વમિવ વૃષ્ટિમન્તઃ પ્રભેદાત્ ।
યોધાગ્રણ્યઃ પ્રતિદશમુખં સંયુગે તસ્થિવાંસઃ
પ્રત્યાદિષ્ટાભરણ-રુચયશ્ચન્દ્રહાસ-વ્રણાઙ્કૈઃ ॥ ૨.૧૩॥

મત્વા દેવં ધનપતિસખં યત્ર સાક્ષાદ્-વસન્તં
પ્રાયશ્ચાપં ન વહતિ ભયાન્મન્મથઃ ષટ્પદજ્યમ્ ।
સભ્રૂભઙ્ગ-પ્રહિતનયનૈઃ કામિલક્ષ્યેષ્વમોઘૈઃ
તસ્યારમ્ભશ્ચતુરવનિતા-વિભ્રમૈરેવ સિદ્ધઃ ॥ ૨.૧૪॥

તત્રાગારં ધનપતિ-ગૃહાનુત્તરેણાસ્મદીયં
દૂરાલ્લક્ષ્યં સુરપતિ-ધનુશ્ચારુણા તોરણેન ।
યસ્યોપાન્તે કૃતકતનયઃ કાન્તયા વર્ધિતો મે
હસ્તપ્રાપ્ય-સ્તબકનમિતો બાલમન્દારવૃક્ષઃ ॥ ૨.૧૫॥

વાપી ચાસ્મિન્ મરકતશિલા-બદ્ધસોપાનમાર્ગા
હૈમૈશ્છન્ના વિકચ-કમલૈઃ સ્નિગ્ધ-વૈદૂર્યનાલૈઃ ।
યસ્યાસ્તોયે કૃત-વસતયો માનસં સંનિકૃષ્ટં
નાધ્યાસ્યન્તિ વ્યપગત-શુચસ્ત્વામપિ પ્રેક્ષ્ય હંસાઃ ॥ ૨.૧૬॥

તસ્યાસ્તીરે રચિતશિખરઃ પેશલૈરિન્દ્રનીલૈઃ
ક્રીડાશૈલઃ કનકકદલી-વેષ્ટનપ્રેક્ષણીયઃ ।
મદ્ગેહિન્યાઃ પ્રિય ઇતિ સખે ચેતસા કાતરેણ
પ્રેક્ષ્યોપાન્ત-સ્ફુરિતતડિતં ત્વાં તમેવ સ્મરામિ ॥ ૨.૧૭॥

રક્તાશોકશ્ચલ-કિસલયઃ કેસરશ્ચાત્ર કાન્તઃ
પ્રત્યાસન્નૌ કુરબક-વૃતેર્માધવીમણ્ડપસ્ય ।
એકઃ સખ્યાસ્તવ સહ મયા વામપાદાભિલાષી
કાઙ્ક્ષત્યન્યો વદનમદિરાં દોહદચ્છદ્મનાસ્યાઃ ॥ ૨.૧૮॥

તન્મધ્યે ચ સ્ફટિકફલકા કાઞ્ચની વાસયષ્ટિઃ
મૂલે બદ્ધા મણિભિરનતિપ્રૌઢ-વંશપ્રકાશૈઃ ।
તાલૈઃ શિઞ્જાવલય-સુભગૈર્નર્તિતઃ કાન્તયા મે
યામધ્યાસ્તે દિવસવિગમે નીલકણ્ઠઃ સુહૃદ્-વઃ ॥ ૨.૧૯॥

એભિઃ સાધો હૃદય-નિહિતૈર્લક્ષણૈર્લક્ષયેથા
દ્વારોપાન્તે લિખિત-વપુષૌ શઙ્ખપદ્મૌ ચ દૃષ્ટ્વા ।
ક્ષામચ્છાયં ભવનમધુના મદ્વિયોગેન નૂનં
સૂર્યાપાયે ન ખલુ કમલં પુષ્યતિ સ્વામભિખ્યામ્ ॥ ૨.૨૦॥

ગત્વા સદ્યઃ કલભ-તનુતાં શીઘ્ર-સમ્પાતહેતોઃ
ક્રીડાશૈલે પ્રથમકથિતે રમ્યસાનૌ નિષણ્ણઃ ।
અર્હસ્યન્તર્ભવન-પતિતાં કર્તુમલ્પાલ્પ-ભાસં
ખદ્યોતાલી-વિલસિતનિભાં વિદ્યુદુન્મેષ-દૃષ્ટિમ્ ॥ ૨.૨૧॥

તન્વી શ્યામા શિખરિ-દશના પક્વબિમ્બાધરોષ્ઠી
મધ્યે ક્ષામા ચકિત-હરિણીપ્રેક્ષણા નિમ્નનાભિઃ ।
શ્રોણીભારાદલસગમના સ્તોકનમ્રા સ્તનાભ્યાં
યા તત્ર સ્યાદ્ યુવતિવિષયે સૃષ્ટિરાદ્યેવ ધાતુઃ ॥ ૨.૨૨॥

તાં જાનીથાઃ પરિમિતકથાં જીવિતં મે દ્વિતીયં
દૂરીભૂતે મયિ સહચરે ચક્રવાકીમિવૈકામ્ ।
ગાઢોત્કણ્ઠાં  ગુરુષુ દિવસેષ્વેષુ ગચ્છત્સુ બાલાં
જાતાં મન્યે શિશિરમથિતાં પદ્મિનીં વાઽન્યરૂપામ્ ॥ ૨.૨૩॥

નૂનં તસ્યાઃ પ્રબલ-રુદિતોચ્છૂનનેત્રં પ્રિયાયા
નિઃશ્વાસાનામશિશિરતયા ભિન્ન-વર્ણાધરોષ્ઠમ્ ।
હસ્તન્યસ્તં મુખમસકલ-વ્યક્તિ લમ્બાલકત્વાદ્-
ઇન્દોર્દૈન્યં ત્વદનુસરણ-ક્લિષ્ટકાન્તેર્બિભર્તિ ॥ ૨.૨૪॥

આલોકે તે નિપતતિ પુરા સા બલિવ્યાકુલા વા
મત્સાદૃશ્યં વિરહતનુ વા ભાવગમ્યં લિખન્તી ।
પૃચ્છન્તી વા મધુરવચનાં સારિકાં પઞ્જરસ્થાં
કચ્ચિદ્-ભર્તુઃ સ્મરસિ રસિકે ત્વં હિ તસ્ય પ્રિયેતિ ॥ ૨.૨૫॥

ઉત્સઙ્ગે વા મલિનવસને સૌમ્ય નિક્ષિપ્ય વીણાં
મદ્ગોત્રાઙ્કં વિરચિતપદં ગેયમુદ્ગાતુકામા ।

તન્ત્રીમાર્દ્રાં નયનસલિલૈઃ સારયિત્વા કથંચિદ્
ભૂયો ભૂયઃ સ્વયમપિ કૃતાં મૂર્ચ્છનાં વિસ્મરન્તી ॥ ૨.૨૬॥

શેષાન્ માસાન્ વિરહદિવસ-સ્થાપિતસ્યાવધેર્વા
વિન્યસ્યન્તી ભુવિ ગણનયા દેહલી-દત્તપુષ્પૈઃ ।
સંભોગં વા હૃદય-નિહિતારમ્ભમાસ્વાદયન્તી ( મત્સઙ્ગં વા)
પ્રાયેણૈતે રમણ-વિરહેષ્વઙ્ગનાનાં વિનોદાઃ ॥ ૨.૨૭॥

સવ્યાપારામહનિ ન તથા પીડયેન્મદ્વિયોગઃ ( પીડયેદ્વિપ્રયોગઃ)
શઙ્કે રાત્રૌ ગુરુતરશુચં નિર્વિનોદાં સખીં તે ।
મત્સંદેશૈઃ સુખયિતુમલં પશ્ય સાધ્વીં નિશીથે
તામુન્નિદ્રામવનિ-શયનાં સૌધ-વાતાયનસ્થઃ ॥ ૨.૨૮॥

સ્નિગ્ધાઃ સખ્યઃ ક્ષણમપિ દિવા તાં ન મોક્ષ્યન્તિ તન્વીં
એકપ્રખ્યા ભવતિ હિ જગત્યઙ્ગનાનાં પ્રવૃત્તિઃ ।
સ ત્વં રાત્રૌ જલદ શયનાસન્ન-વાતાયાનસ્થઃ
કાન્તાં સુપ્તે સતિ પરિજને વીતનિદ્રામુપેયાઃ ॥ ? ॥

અન્વેષ્ટવ્યામવનિશયને સન્નિકીર્ણૈકપાર્શ્વાં
તત્પર્યન્ત-પ્રગલિત-લવૈશ્છિન્ન-હારૈરિવાસ્રૈઃ ।
ભૂયો ભૂયઃ કઠિનવિષમાં સારયન્તીં કપોલાદ્
આમોક્તવ્યામયમિતનખેનૈકવેણીં કરેણ ॥ ? ॥

આધિક્ષામાં વિરહશયને સંનિષણ્ણૈકપાર્શ્વાં
પ્રાચીમૂલે તનુમિવ કલામાત્રશેષાં હિમાંશોઃ ।
નીતા રાત્રિઃ ક્ષણ ઇવ મયા સાર્ધમિચ્છારતૈર્યા
તામેવોષ્ણૈર્વિરહ-મહતીમશ્રુભિર્યાપયન્તીમ્ ॥ ૨.૨૯॥

પાદાનિન્દોરમૃત-શિશિરાન્ જાલમાર્ગ-પ્રવિષ્ટાન્
પૂર્વપ્રીત્યા ગતમભિમુખં સંનિવૃત્તં તથૈવ ।
ચક્ષુઃ ખેદાત્ સલિલગુરુભિઃ પક્ષ્મભિશ્છાદયન્તીં
સાભ્રેઽહ્નીવ સ્થલકમલિનીં ન પ્રબુદ્ધાં ન સુપ્તામ્ ॥ ૨.૩૦॥

નિઃશ્વાસેનાધર-કિસલય-ક્લેશિના વિક્ષિપન્તીં
શુદ્ધસ્નાનાત્ પરુષમલકં નૂનમાગણ્ડ-લમ્બમ્ ।
મત્સંભોગઃ કથમુપનમેત્ સ્વપ્નજોઽપીતિ નિદ્રાં
આકાઙ્ક્ષન્તીં નયનસલિલોત્પીડ-રુદ્ધાવકાશામ્ ॥ ૨.૩૧॥

આદ્યે બદ્ધા વિરહદિવસે યા શિખા દામ હિત્વા
શાપસ્યાન્તે વિગલિતશુચા તાં મયોદ્વેષ્ટનીયામ્ ।
સ્પર્શ-ક્લિષ્ટામયમિતનખેનાસકૃત્ સારયન્તીં
ગણ્ડાભોગાત્ કઠિન-વિષમામેકવેણીં કરેણ ॥ ૨.૩૨॥

સા સંન્યસ્તાભરણમબલા પેશલં ધારયન્તી
શય્યોત્સઙ્ગે નિહિતમસકૃદ્-દુઃખદુઃખેન ગાત્રમ્ ।
ત્વામપ્યસ્રં નવજલમયં મોચયિષ્યત્યવશ્યં
પ્રાયઃ સર્વો ભવતિ કરુણાવૃત્તિરાર્દ્રાન્તરાત્મા ॥ ૨.૩૩॥

જાને સખ્યાસ્તવ મયિ મનઃ સંભૃત-સ્નેહમસ્માદ્-
ઇત્થંભૂતાં પ્રથમવિરહે તામહં તર્કયામિ ।
વાચાલં માં ન ખલુ સુભગંમન્યભાવઃ કરોતિ
પ્રત્યક્ષં તે નિખિલમચિરાદ્-ભ્રાતરુક્તં મયા યત્ ॥ ૨.૩૪॥

રુદ્ધાપાઙ્ગ-પ્રસરમલકૈરઞ્જનસ્નેહશૂન્યં
પ્રત્યાદેશાદપિ ચ મધુનો વિસ્મૃત-ભ્રૂવિલાસમ્ ।
ત્વય્યાસન્ને નયનમુપરિસ્પન્દિ શઙ્કે મૃગાક્ષ્યા
મીનક્ષોભાચ્ચલ-કુવલયશ્રી-તુલામેષ્યતીતિ ॥ ૨.૩૫॥

વામશ્ચાસ્યાઃ કરરુહપદૈર્મુચ્યમાનો મદીયૈઃ
મુક્તાજાલં ચિરપરિચિતં ત્યાજિતો દૈવગત્યા ।
સંભોગાન્તે મમ સમુચિતો હસ્તસંવાહનાનાં
યાસ્યત્યૂરુઃ સરસકદલી-સ્તમ્ભગૌરશ્ચલત્વમ્ ॥ ૨.૩૬॥

તસ્મિન્ કાલે જલદ યદિ સા લબ્ધનિદ્રાસુખા સ્યાદ્-
અન્વાસ્યૈનાં સ્તનિતવિમુખો યામમાત્રં સહસ્વ ।
મા ભૂદસ્યાઃ પ્રણયિનિ મયિ સ્વપ્નલબ્ધે કથંચિત્
સદ્યઃકણ્ઠચ્યુત-ભુજલતાગ્રન્થિ ગાઢોપગૂઢમ્ ॥ ૨.૩૭॥

તામુત્થાપ્ય સ્વજલકણિકા-શીતલેનાનિલેન
પ્રત્યાશ્વસ્તાં સમમભિનવૈર્જાલકૈર્માલતીનામ્ ।
વિદ્યુદ્ગર્ભઃ સ્તિમિતનયનાં ત્વત્સનાથે ગવાક્ષે
વક્તું ધીરસ્તનિત-વચનૈર્માનિનીં પ્રક્રમેથાઃ ॥ ૨.૩૮॥

ભર્તુર્મિત્રં પ્રિયમવિધવે વિદ્ધિ મામમ્બુવાહં

તત્સંદેશૈર્હૃદય-નિહિતૈરાગતં ત્વત્સમીપમ્ ।
યો વૃન્દાનિ ત્વરયતિ પથિ શ્રામ્યતાં પ્રોષિતાનાં
મન્દ્રસ્નિગ્ધૈર્ધ્વનિભિરબલા-વેણિમોક્ષોત્સુકાનિ ॥ ૨.૩૯॥

ઇત્યાખ્યાતે પવનતનયં મૈથિલીવોન્મુખી સા
ત્વામુત્કણ્ઠોચ્છ્વસિતહૃદયા વીક્ષ્ય સંભાવ્ય ચૈવ ।
શ્રોષ્યત્યસ્માત્ પરમવહિતા સૌમ્ય સીમન્તિનીનાં
કાન્તોદન્તઃ સુહૃદુપનતઃ સઙ્ગમાત્કિંચિદૂનઃ ॥ ૨.૪૦॥

તામાયુષ્મન્ મમ ચ વચનાદાત્મનશ્ચોપકર્તું
બ્રૂયા એવં તવ સહચરો રામગિર્યાશ્રમસ્થઃ ।
અવ્યાપન્નઃ કુશલમબલે પૃચ્છતિ ત્વાં વિયુક્તઃ
પૂર્વાભાષ્યં સુલભવિપદાં પ્રાણિનામેતદેવ ॥ ૨.૪૧॥

અઙ્ગેનાઙ્ગં પ્રતનુ તનુના ગાઢતપ્તેન તપ્તં
સાસ્રેણાશ્રુદ્રુતમવિરતોત્કણ્ઠમુત્કણ્ઠિતેન ।
ઉષ્ણોચ્છ્વાસં સમધિકતરોચ્છ્વાસિના દૂરવર્તી
સઙ્કલ્પૈસ્તૈર્વિશતિ વિધિના વૈરિણા રુદ્ધમાર્ગઃ ॥ ૨.૪૨॥

શબ્દાખ્યેયં યદપિ કિલ તે યઃ સખીનાં પુરસ્તાત્
કર્ણે લોલઃ કથયિતુમભૂદાનન-સ્પર્શલોભાત્ ।
સોઽતિક્રાન્તઃ શ્રવણવિષયં લોચનાભ્યામદૃષ્ટઃ
ત્વામુત્કણ્ઠા-વિરચિતપદં મન્મુખેનેદમાહ ॥ ૨.૪૩॥

શ્યામાસ્વઙ્ગં ચકિત-હરિણીપ્રેક્ષણે દૃષ્ટિપાતં
વક્ત્રચ્છાયાં શશિનિ શિખિનાં બર્હભારેષુ કેશાન્ ।
ઉત્પશ્યામિ પ્રતનુષુ નદીવીચિષુ ભ્રૂવિલાસાન્
હન્તૈકસ્મિન્ક્વચિદપિ ન તે ચણ્ડિ સાદૃશ્યમસ્તિ ॥ ૨.૪૪॥

ત્વામાલિખ્ય પ્રણયકુપિતાં ધાતુરાગૈઃ શિલાયાં
આત્માનં તે ચરણપતિતં યાવદિચ્છામિ કર્તુમ્ ।
અસ્રૈસ્તાવન્-મુહુરુપચિતૈર્દૃષ્ટિરાલુપ્યતે મે
ક્રૂરસ્તસ્મિન્નપિ ન સહતે સઙ્ગમં નૌ કૃતાન્તઃ ॥ ૨.૪૫॥

ધારાસિક્તસ્થલ-સુરભિણસ્ત્વન્મુખસ્યાસ્ય બાલે
દૂરીભૂતં પ્રતનુમપિ માં પઞ્ચબાણઃ ક્ષિણોતિ ।
ઘર્માન્તેઽસ્મિન્વિગણય કથં વાસરાણિ વ્રજેયુઃ

દિક્સંસક્ત-પ્રવિતતઘન-વ્યસ્તસૂર્યાતપાનિ ॥ ? ॥

મામાકાશ-પ્રણિહિતભુજં નિર્દયાશ્લેષહેતોઃ
લબ્ધાયાસ્તે કથમપિ મયા સ્વપ્ન-સંદર્શનેષુ ।
પશ્યન્તીનાં ન ખલુ બહુશો ન સ્થલીદેવતાનાં
મુક્તાસ્થૂલાસ્તરુ-કિસલયેષ્વશ્રુલેશાઃ પતન્તિ ॥ ૨.૪૬॥

ભિત્ત્વા સદ્યઃ કિસલયપુટાન્ દેવદારુદ્રુમાણાં
યે તત્ક્ષીર-સ્રુતિસુરભયો દક્ષિણેન પ્રવૃત્તાઃ ।
આલિઙ્ગ્યન્તે ગુણવતિ મયા તે તુષારાદ્રિવાતાઃ
પૂર્વસ્પૃષ્ટં યદિ કિલ ભવેદઙ્ગમેભિસ્તવેતિ ॥ ૨.૪૭॥

સંક્ષિપ્યેત ક્ષણ ઇવ કથં દીર્ઘયામા ત્રિયામા
સર્વાવસ્થાસ્વહરપિ કથં મન્દમન્દાતપં સ્યાત્ ।
ઇત્થં ચેતશ્ચટુલનયને દુર્લભપ્રાર્થનં મે
ગાઢોષ્માભિઃ કૃતમશરણં ત્વદ્વિયોગ-વ્યથાભિઃ ॥ ૨.૪૮॥

નન્વાત્માનં બહુ વિગણયન્નાત્મનૈવાવલમ્બે
તત્ કલ્યાણિ ત્વમપિ નિતરાં મા ગમઃ કાતરત્વમ્ ।
કસ્યાત્યન્તં સુખમુપનતં દુઃખમેકાન્તતો વા
નીચૈર્ગચ્છત્યુપરિ ચ દશા ચક્રનેમિક્રમેણ ॥ ૨.૪૯॥

શાપાન્તો મે ભુજગ-શયનાદુત્થિતે શાર્ઙ્ગપાણૌ
શેષાન્માસાન્ ગમય ચતુરો લોચને મીલયિત્વા ।
પશ્ચાદાવાં વિરહગુણિતં તં તમાત્માભિલાષં
નિર્વેક્ષ્યાવઃ પરિણત-શરચ્ચન્દ્રિકાસુ ક્ષપાસુ ॥ ૨.૫૦॥

ભૂયશ્ચાહ ત્વમપિ શયને કણ્ઠલગ્ના પુરા મે
નિદ્રાં ગત્વા કિમપિ રુદતી સસ્વનં વિપ્રબુદ્ધા ।
સાન્તર્હાસં કથિતમસકૃત્ પૃચ્છતશ્ચ ત્વયા મે
દૃષ્ટઃ સ્વપ્ને કિતવ રમયન્ કામપિ ત્વં મયેતિ ॥ ૨.૫૧॥

એતસ્માન્માં કુશલિનમભિજ્ઞાન-દાનાદ્-વિદિત્વા
મા કૌલીનાદસિતનયને મય્યવિશ્વાસિની ભૂઃ ।
સ્નેહાનાહુઃ કિમપિ વિરહે ધ્વંસિનસ્તે ત્વભોગાદ્
ઇષ્ટે વસ્તુન્યુપચિતરસાઃ પ્રેમરાશીભવન્તિ ॥ ૨.૫૨॥

આશ્વાસ્યૈવં પ્રથમવિરહોદગ્રશોકાં સખીં તે
શૈલાદાશુ ત્રિનયન-વૃષોત્ખાત-કૂટાન્નિવૃત્તઃ ।
સાભિજ્ઞાન-પ્રહિતકુશલૈસ્તદ્વચોભિર્મમાપિ
પ્રાતઃ કુન્દપ્રસવ-શિથિલં જીવિતં ધારયેથાઃ ॥ ૨.૫૩ ॥

કચ્ચિત્ સૌમ્ય વ્યવસિતમિદં બન્ધુકૃત્યં ત્વયા મે
પ્રત્યાદેશાન્ન ખલુ ભવતો ધીરતાં કલ્પયામિ ।
નિઃશબ્દોઽપિ પ્રદિશસિ જલં યાચિતશ્ચાતકેભ્યઃ
પ્રત્યુક્તં હિ પ્રણયિષુ સતામીપ્સિતાર્થ-ક્રિયૈવ ॥ ૨.૫૪ ॥

એતત્ કૃત્વા પ્રિયમનુચિત-પ્રાર્થનાવર્તિનો મે
સૌહાર્દાદ્-વા વિધુર ઇતિ વા મય્યનુક્રોશબુદ્ધ્યા ।
ઇષ્ટાન્ દેશાન્ વિચર પ્રાવૃષા સંભૃતશ્રીઃ
મા ભૂદેવં ક્ષણમપિ ચ તે વિદ્યુતા વિપ્રયોગઃ ॥ ૨.૫૫ ॥

ઇત્યાખ્યાતે સુરપતિસખઃ શૈલકુલ્યાપુરીષુ
સ્થિત્વા સ્થિત્વા ધનપતિપુરીં વાસરૈઃ કૈશ્ચિદાપ ।
મત્વાગારં કનકરુચિરં લક્ષણૈઃ પૂર્વમુક્તૈઃ
તસ્યોત્સઙ્ગે ક્ષિતિતલગતાં તાં ચ દીનાં દદર્શ ॥ ? ॥

તસ્માદદ્રેર્નિગદિતુમથો શીઘ્રમેત્યાલકાયાં
યક્ષાગારં વિગલિતનિભં દિષ્ટચિહ્નૈર્વિદિત્વા ।
યત્ સંદિષ્ટં પ્રણયમધુરં ગુહ્યકેન પ્રયત્નાત્
તદ્ગેહિન્યાઃ સકલમવદત્ કામરૂપી પયોદઃ ॥ ? ॥

તત્સંદેશં જલધરવરો દિવ્યવાચાઽઽચચક્ષે
પ્રાણાંસ્તસ્યા જનહિતરતો રક્ષિતું યક્ષવધ્વાઃ ।
પ્રાપ્યોદન્તં પ્રમુદિતમનાઃ સાપિ તસ્થૌ સ્વભર્તુઃ
કેષાં ન સ્યાદવિતથફલા પ્રાર્થના હ્યુત્તમેષુ ॥ ? ॥

શ્રુત્વા વાર્ત્તાં જલદકથિતાં તાં ધનેશોઽપિ સદ્યઃ
શાપસ્યાન્તં સદયહૃદયઃ સંવિધાયાસ્તકોપઃ ।
સંયોજ્યૈતૌ વિગલિતશુચૌ દંપતી હૃષ્ટચિત્તૌ
ભોગાનિષ્ટાનવિરતસુખં ભોજયામાસ શશ્વત્ ॥ ? ॥

ઇત્થંભૂતં સુરચિતપદં મેઘદૂતાભિધાનં
કામક્રીડાવિરહિતજને વિપ્રયોગે વિનોદઃ ।

મેઘસ્યાસ્મિન્નતિનિપુણતા બુદ્ધિભાવઃ કવીનાં
નત્વાર્યાયાશ્ચરણકમલં કાલિદાસશ્ચકાર ॥ ? ॥

ઇતિ મેઘદૂતં સમ્પૂર્ણમ્ ।

Notes:
The variations પાઠભેદ are given in
parenthesis () on the right of the verse line.

Verses marked with ? are believed to
be interpolations and those added in the end
appear to be composed by a later poet.

Encoded by Avinash Sathaye and Jost Gippert
Proofread by Avinash Sathaye, Jost Gippert,
and reconfigured by Rajani Arjun Shankar.

---

*Meghadutam Kalidasa's Cloud Messenger*
pdf was typeset on April 17, 2025

Please send corrections to *sanskrit@cheerful.com*